# shrIdurgAstotram from Rudrayamala

# શ્રીદુર્ગાસ્તોત્રમ્ રુદ્રયામલાન્તર્ગતમ્

## Document Information

Text title : durgAstotram 3 from rudrayAmala

File name : durgAstotramrudrayAmala.itx

Category : devii, durgA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : December 9, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીદુર્ગાસ્તોત્રમ્ રુદ્રયામલાન્તર્ગતમ્

અથ દુર્ગાસ્તોત્રમ્ ।
શ્રીભૈરવ ઉવાચ
અધુના દેવિ વક્ષ્યામિ દુર્ગાસ્તોત્રં મનોહરમ્ ।
મૂલમન્ત્રમયં દિવ્યં સર્વસારસ્વતપ્રદમ્ ॥ ૧॥

દુર્ગાર્તિશમનં પુણ્યં સાધકાનાં જયપ્રદમ્ ।
દુર્ગાયા અઙ્ગભૂતં તુ સ્તોત્રરાજં પરાત્પરમ્ ॥ ૨॥

શ્રીદુર્ગાસ્તોત્રરાજસ્ય ઋષિર્દેવો મહેશ્વરઃ ।
છન્દોઽનુષ્ટુપ્ દેવતાપિ શ્રીદુર્ગાષ્ટાક્ષરા શિવે ॥ ૩॥

દું બીજઞ્ચ પરા શક્તિઃ નમઃ કીલકમીશ્વરિ ।
ધર્માર્થકામમોક્ષાર્થે શ્રીદુર્ગાસ્તોત્રપાઠે વિનિયોગઃ ॥ ૪॥

અથ ધ્યાનમ્
દૂર્વાનિભાં ત્રિનયનાં વિલસત્કિરીટાં
    શઙ્ખાબ્જખડ્ગશરખેટકશૂલચાપામ્ ।
સન્તર્જનીં ચ દધતીં મહિષાસનસ્થાં
    દુર્ગાન્તવારકુલપીઠગતાં ભજેઽહમ્ ॥ ૧॥

તારં હારં મન્ત્રમાલા સુબીજં ધ્યાયેદન્તર્યો બલં બાલકાન્તઃ ।
તસ્ય સ્મારં સ્મારમઙ્ઘ્રિદ્વયં ચ રમ્યાયાતિ સ્વર્ગતા કામવશ્યા ॥ ૨॥

માયાં જપેદ્યસ્તવ મન્ત્રમધ્યે દુર્ગે સદા દુર્ગતિખેદખિન્નઃ ।
ભવેચ્ચ ભૂમૌ નૃપમાલિમાલામાણિક્યનિર્ઘૃષ્ટપદારવિન્દઃ ॥ ૩॥

ચાક્રિયં યદિ જપેત્તવાઽઙ્ઘ્રિકે ચક્રમધ્યગત ઈશ્વરીશ્વરિ ।
સાધકો ભવતિ ચક્રવર્તિનાં નાયકો મમ વિલાસકોવિદઃ ॥ ૪॥

ચક્રિબીજમપરં સ્મરેચ્છિવે યોઽરિવર્ગવિહિતાદતવ્યયઃ ।
આનિમેઽલગતે જપેદ્રિપૂન્ વાજિવારણરથાશ્રિતો નરઃ ॥ ૫॥

દુર્ગાબીજં યો જપેત્ પ્રેતભૂમૌ સાયં માયા ભસ્મનાઽઽલિપ્તકાયઃ ।
ત્રિર્વારણાનાં નાયકો દેવિ ।
મન્ત્રી ભુક્ત્વા રાજ્યં પ્રાજ્યમાજ્યં કરોતિ ॥ ૬॥

વાયવ્યબીજં યદિ સાધકો જપેત્ પ્રિયાકુચદ્વન્દ્વવિમર્દનક્ષમઃ ।
સમસ્તકાન્તાજનનેત્રવાગુરો વિલાસહંસો ભવિતા સ પાર્વતિ ॥ ૭॥

વિશ્વે વિશ્વેશ્વરિ યદિ જપેત્ કામવેલાકલાર્તૌ
    રાત્રૌ માત્રાક્ષરવિલસિતં માસ ઈશાનિ નામ ।
તસ્ય સ્મેરાનનસરસિજા ભ્રાજમાનાઙ્ગલક્ષ્મી
    વશ્યાવશ્યં સૂરપૂરવધૂમૌલિ માલા વશામા ॥ ૮॥

ભૂગેહાશ્રિત વહ્નિવૃત્તવિલસન્નાગારવૃત્તાર્ચિત-
    વ્યગ્રારોલ્લ સિતાગ્નિકોણ વિલસચ્છ્રી બિન્દુ પીઠસ્થિતામ્ ।
ધ્યાયેચ્ચેતસિ શર્વપત્નિ ભવતીં માધ્વીરસાધૂર્ણિતાં
    યો મન્ત્રી સ ભવિષ્યતિ સ્મરસમઃ સ્ત્રીણાં ધરણ્યાં દિવિ ॥ ૯॥

દુર્ગાસ્તવં મનુમયં મનુરાજમૌલિ-
    ર્માણિક્યમુત્તમશિવાઙ્ગરહસ્યભૂતમ્ ।
પ્રાતઃ પઠેદ્યદિ જપાવસરેઽર્યમાયાં
    ભૂમૌ ભવેત્ સ નૃપતિર્દિવિ દેવનાથઃ ॥ ૧૦॥

ઇદં સ્તોત્રં મહાપુણ્યં પઞ્ચાઙ્ગૈકશિરોમણિમ્ ।
યઃ પઠેદર્ધરાત્રે તુ તસ્ય વશ્યં જગત્ત્રયમ્ ॥ ૧૧॥

ઇદં પઞ્ચાઙ્ગમખિલં શ્રીદુર્ગાયા રહસ્યકમ્ ।
સર્વસિદ્ધિપ્રદં ગુહ્યં સર્વદા પરિપૂરકમ્ ॥ ૧૨॥ સર્વાશા
ગુહ્યં મન્ત્રરહસ્યં તુ તવ ભક્ત્યા પ્રકાશિતમ્ ।
અભક્તાય ન દાતવ્યમિત્યાજ્ઞા પારમેશ્વરી ॥ ૧૩॥

શ્રીદેવ્યુવાચ
ભગવન્ ભવતા તેન કથનેન મહેશ્વર ।
શ્રીપઞ્ચાઙ્ગસ્ય દુર્ગાયા અથ પ્રીતાસ્મ્યહં પરમ્ ॥ ૧૪॥

શ્રીભૈરવ ઉવાચ
ઇદં રહસ્યં પરમં દુર્ગાસર્વસ્વમુત્તમમ્ ।

પઞ્ચાઙ્ગં વર્ણિતં ગોપ્યં ગોપનીયં સ્વયોનિવત્ ॥ ૧૫॥

ઇતિ શ્રીરુદ્રયામલેતન્ત્રે દેવીરહસ્યે દુર્ગાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIdurgAstotram from Rudrayamala*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*